Palash Ghorai, “श्रीरामकृष्णानां विज्ञानवेदान्तदिशा ईश्वरस्वरूपपर्यालोचनम्,” *Vedānta Science and Technology: A multidimensional Approach* (Proceeding of the 22nd International Vedanta Congress 2015, JNU, New Delhi, India), Girish Nath Jha, Bal Ram Sing & Sukalyan Sengupta (Eds), 2021, pp. 479-493.

# विषयः- श्रीरामकृष्णानां विज्ञानवेदान्तदिशा ईश्वरस्वरूपपर्यालोचनम्

लेखकः - **पलाश-घोडइः**

**Abstract-**

The philosophy of Sri Ramakrishna and Swami Vivekananda is nowadays called Neo-Vedānta, integral Vedānta, Integral Advaita etc. Sri Ramakrishna harmonizes all the philosophical schools of Vedānta, religions and spiritual paths from the standpoint of his own realization of *Vijñāna.* This harmonization is actually present in our holy scriptures like *Upniṣads, Gītā,* etc. Therefore, according to Ayon Maharaj, it is more appropriate to call the philosophy of Sri Ramakrishna *Vijñāna*-Vedānta than Neo-Vedānta. *Vijñāna* is the most fundamental concept to understand the philosophy of Sri Ramakrishna. Sri Ramakrishna, having firmly established in the experience of *Vijñāna,* declares that *Īśvara* is at once with form, without form, both and beyond both. None can understand and therefore can limit the nature of *Īśvara* by his own limited intelligence. One Absolute *Īśvara* can have numerous natures and therefore numerous forms from different standpoints. In this paper I want to discuss the nature of *Īśvara* according to Sri Ramakrishna's philosophy. Here I will show that Sri Ramakrishna's unique contribution to the modern philosophy is to harmonize the philosophical schools of Vedānta, religions and spiritual paths based on a non-sectarian, liberal and all-inclusive concept of *Īśvara.*

**प्रबन्धसारः -**

आधुनिककाले श्रीरामकृष्ण-विवेकानन्दस्वामिपादानां दर्शनं विद्वद्भिः नवीनवेदान्त-समन्वयिवेदान्त-सम्वन्वय्वद्वैतादिनानाभिधानैः समाहूयते। विज्ञानतत्त्वमाश्रित्यैव श्रीरामकृष्णदर्शने सर्वेषां वेदान्तदर्शनानां धर्माणां साधनमार्गाणां च यथार्थतया समन्वयः साधयितुं शक्यते इति कारणात् तद् विज्ञानवेदान्ताह्वयमिति विदुषाम् अयनमहाराजानां मतम्। विज्ञानतत्त्वे प्रतिष्ठितानां श्रीरामकृष्णानां मते ईश्वरो हि साकारो, निराकारः, तदुभयोऽपि तदुभयातिरिक्तः। पृथग्दृष्टिकोणत एकस्यैवेश्वरस्य पृथक्स्वरूपमिति तन्मतम्। श्रीरामकृष्णपरमहंसानाम् एतादृशमीश्वरतत्त्वं प्रबन्धेऽस्मिन् सविस्तरं पर्यालोचयिष्यते। किञ्च, अपरोक्षानुभूतिप्रतिष्ठितानां तेषामेतादृशं तत्त्वं कथं शास्त्रसम्मतमिति विषयोऽपि प्रबन्धेऽस्मिन् पर्यालोचयिष्यते।

**मूलशब्दाः -** ईश्वरः, ज्ञानम्, निराकारः, निर्गुणम्, ब्रह्म, श्रीरामकृष्णः, सगुणम्, साकारः, विज्ञानम्,वेदान्तः।

श्रृण्वन्तु विश्वेऽमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः।
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥[1]

[1]श्वेताश्वतरोपनिषत् २.५ & ३.८।

## भूमिका -

सर्वाण्यपि वेदान्तदर्शनानि अद्वैत-द्वैत-विशिष्टाद्वैत-भेदाभेदादीनि ईश्वरस्वरूपं पर्यालोचयन्ति। तत्तद्दर्शनसिद्धान्तप्रतिष्ठापका आचार्या उपनिषदादिशास्त्रप्रमाणमाश्रित्य स्वीयापरोक्षानुभूतिञ्चासाद्य तेषां बुद्धौ प्रकाशमानमीश्वरस्वरूपं यथार्थमिति निश्चिन्वन्तः शास्त्रव्याख्यानं चक्रुः। तत्तद्दर्शनसिद्धान्तेषु परस्परविरोधाद् ईश्वरस्वरूपं वस्तुतः किमिति तत्त्वजिज्ञासूनां महान् सन्देहः समुदेत्येव। सन्देहनिरसनाय उपनिषद्भगवद्गीतादिमूलग्रन्थानां तात्पर्यं सम्यक्तया अवगन्तुं ते प्रयतन्ते। परन्तु भाष्यव्यतिरेकेण मूलग्रन्थानाम् तात्पर्यावगनं न सर्वेषां सुकरम्। यदि पुनः भाष्याधारेण शास्त्राणि अवगन्तुमिष्यन्ते तर्हि भाष्येषु परस्परव्याख्यानविरोधात् शास्त्रतात्पर्यं वस्तुतः किमिति स एव सन्देहः पुनरापतति। अद्वैतादिदर्शनानि यद्यपि परस्परविरोधनिरासपुरःसरं समन्वयं प्रतिपादयितुं प्रयतन्ते तथापि तत्र तत्र स्वमतस्यैव श्रेष्ठत्वं सर्वैः प्रतिपाद्यते इत्यस्ति महान् पक्षपातदोषः। तथाहि- शङ्करभगवत्पादानाम् अद्वैतवेदान्तमते तत्त्वज्ञानं निर्गुणब्रह्मज्ञानादेव भवति, निष्कामकर्माणि सुगणोपासनानि च चित्तशुद्धि-चित्तैकाग्रतासम्पादकत्वेन तत्त्वज्ञाने आरादुपकारकाणीति स्वीक्रियते। अद्वैतवेदान्तमते निर्गुणं ब्रह्मैव परमार्थतः सत्यं, सगुणब्रह्म-जीव-जगतां च व्यावहारिकसत्यत्वेऽपि परमार्थतो मिथ्यात्वम्। अद्वैतिभिरेवं समन्वये क्रियमाणे स्वमतस्य श्रेष्ठत्वम् अन्येषां च अवरत्वं सुस्पष्टं प्रकाशते। नैतादृशं व्याख्यानं द्वैत-विशिष्टाद्वैतादिवादिनोऽभ्युपगच्छन्ति। तेऽपि स्वमतश्रेष्टत्वख्यापनपरकं भिन्नप्रकारकं समन्वयं प्रतिपादयन्ति यच्च अद्वैतादिदर्शने स्वीकर्तुं न शक्यते। ननु तर्हि समन्वयः कथं शक्येत, कथं च सन्देहो निराकृतः स्यादिति चेत् तादृश एक अध्यात्मसाधकः अपेक्ष्यते यो बहूनि अद्वैतद्वैतादिदर्शनमतानि आश्रित्य साधनं कृत्वा अपरोक्षानूभूतिमासाद्य तेषां दर्शनानां समन्वयं प्रतिपादयामास तस्यैव वचनं प्रमाणं स्यात्। श्रीरामकृष्णपरमहंसा हि तादृशा अध्यात्मसाधका ये स्वजीवने बहूनि मतानि आश्रित्य साधनं विधाय सर्वेषां दर्शनानां धर्माणां साधनमार्गाणां च अविरोधं विजानन्तः समन्वयं प्रतिपादयामासुः।

वस्तुतः श्रीरामकृष्णा दार्शनिका नासन्, किन्तु तदीयोपदेशाधारेण तेषां यद्दर्शनं विद्वद्भिः निर्णीतं तत् श्रीरामकृष्णदर्शनमिति व्यवह्रियते। अयनमहाराजस्य मते श्रीरामकृष्णदर्शनमाश्रित्य विदुषां प्रधानतो गोष्ठीत्रयं विद्यते।[2] प्रथमगोष्ठीयाः परम्परागतेषु निर्दिष्टसम्प्रदायेषु श्रीरामकृष्णदर्शनम् अन्तर्भावयितुमिच्छन्ति। प्रथमगोष्ठ्यामपि मतत्रयं विद्यते। तथाहि स्वामि-ओंकारानन्द-स्वामिधीरेशानन्द-अर्पितामित्र-दीनेशचन्द्रभट्टाचार्यप्रमुखाः श्रीरामकृष्णदर्शनं अद्वैतवेदान्ताधारेण व्याख्यान्ति।[3] श्रीश्रीरामकृष्णकथामृतकाराणां श्रीमहेन्द्रनाथगुप्तपादानां मते श्रीरामकृष्णदर्शनं रामानुजानां विशिष्टाद्वैतवेदान्तेन सह साम्यं बिभर्ति।[4] Walter Neevel महोदयानां मते श्रीरामकृष्णदर्शनं वस्तुतः तान्त्रिकदर्शनमिति।[5] द्वितीयगोष्ठीयानां मते श्रीरामकृष्णपरमहंसानां वस्तुतः किञ्चिद् दर्शनमेव नास्तीति। एतेषु प्रमुखस्थानभाजो भवन्ति नरसिंहशीलमहोदयाः।[6] तृतीयगोष्ठीयाः कस्मिंश्चिद् दर्शनसम्प्रदाये श्रीरामकृष्णदर्शनं

[2]Maharaj, Ayon, 2017, "Sri Ramakrishna's Philosophy of Vijñāna Vedānta" International Journal of Hindu Studies 21, pp.25–54.

[3]कृपया दृश्यताम्-ओंकारानन्द, स्वामी, १९६४ "ब्रह्म ओ शक्ति अभेद" (बङ्गीय), उद्बोधन ६६.५, पृ. २२७-२३२; ओंकारानन्द, स्वामी, १९६४, "नित्य ओ लीला" (बङ्गीय), उद्बोधन ६६.६, पृ. २८७-२९६; धीरेशानन्द, स्वामी, १९६२, "स्वामी विवेकानन्द ओ अद्वैतवाद" (बङ्गीय), उद्बोधन ६५.२, पृ. ७३-८० & ६५.३, पृ. ८०-८१, १३८-१४४; धीरेशानन्द, स्वामी, १९८०, "नाना दृष्टिते श्रीरामकृष्ण" (बङ्गीय), उद्बोधन ८२.५, पृ. २२०-२२६; प्रज्ञानानन्द, स्वामी, १९७६-१९८२, *वाणी ओ विचार : श्रीश्रीरामकृष्णकथामृतेर व्याख्या ओ विश्लेषण* (बङ्गीय), ५ खण्डाः, (कोलकाता रामकृष्ण वेदान्त मठ); Mitra, Arpita, Jan. 2014 "Ramakrishna and Vivekananda: Two Teachings or One?", Prabuddha Bharata 119.1, pp. 66-78 and Feb. 2014, 119.2, pp. 194-203 and 251-259.

[4]२०१०, *श्रीश्रीरामकृष्णकथामृत : श्रीमकथित* (बङ्गीय), कोलकाता : उद्बोधन, पृ. ६९८ (इतः परं सर्वत्र एतत् पुस्तकं मया कथामृत इति नाम्ना व्यवहरिष्यते)। एतद्विषये कृपया दृश्यताम्- प्रभानन्द, स्वामी, २०१२, "कथामृते श्रीरामकृष्णेर मत कि विशिष्टाद्वैतवाद?" (बङ्गीय), स्वामी विवेकानन्द स्मारक (बङ्गीय), कोलकाता: विधाननगर विवेकानन्द स्मारक समिति, पृ. १-७।

[5]Neevel, Walter G, 1976, "The Transformation of Śrī Rāmākrishna," in B.L. Smith, ed., Hinduism: New Essays in the History of Religions (Leiden: Brill), pp. 53-97.

[6]Sil, Narasingha, Nov. 1997, "Is Ramakrishna a Vedantin, a Tantrika or a Vaishnava? An Examination," Asian Studies Review 21.2, p. 212.

नान्तर्भावयन्ति, अपि तु श्रीरामकृष्णदर्शनम् अन्यदर्शनेभ्यो नितरां विलक्षणमिति प्रतिपादयन्ति। एतेषु प्रमुखस्थानभाजो भवन्ति सतीशचन्द्रच्याटार्जी-स्वामितपस्यानन्द-स्वामिश्रद्धानन्दप्रभृतयः।[7] एतेषां तृतीयगोष्ठीनां पदाङ्कम् अनुसरता मया अस्मिन् लघुप्रबन्धे स्वतन्त्रतया श्रीरामकृष्णकथामृतग्रन्थाधारेण ईश्वरतत्त्वनिरूपणाय प्रयत्नो विधास्यते। ईश्वरतत्त्वनिरूपणे अन्यदर्शनेभ्यः श्रीरामकृष्णदर्शनस्य कथं स्वातन्त्र्यमित्यादिविषया अपि मयात्र पर्यालोचयिष्यन्ते।

प्रबन्धेऽस्मिन् प्रथमे भागे विज्ञानतत्त्वाधारेण श्रीरामकृष्णदर्शनपरिचयः संक्षेपेण निगद्यते। ततो द्वितीये भागे कथामृतग्रन्थमनुसृत्य श्रीरामकृष्णदर्शने ईश्वरस्वरूपं विस्तरेण पर्यालोचयिष्यते। तत श्रीरामकृष्णोक्तेश्वरस्वरूपविषये शास्त्रप्रामाण्यं पर्यवेक्ष्यते।

## विज्ञानवेदान्तपरिचयः

विज्ञानवेदान्तो नाम नूतनं किञ्चिद् दर्शनमिति न चिन्तनीयम्। श्रीरामकृष्णभगवत्पादानां समन्वयाद्वैतदर्शनमेवात्र विज्ञानवेदान्तपदवाच्यम्। श्रीरामकृष्णदर्शने विज्ञानमेकम् अनन्यसाधारणं तत्त्वं यद् दर्शनान्तरेषु नोपलभ्यते। विज्ञानतत्त्वमाश्रित्यैव श्रीरामकृष्णदर्शने सर्वेषां वेदान्तदर्शनानां धर्माणां साधनमार्गाणां च यथार्थतया समन्वयः साधयितुं शक्यते इति कारणात् तद् विज्ञानवेदान्ताह्वयमिति विदुषाम् अयनमहाराजानां मतम्।[8] सामान्यतो ज्ञानविज्ञानशब्दयोस्तथा भेदो नास्तीति प्रतीयते।[9] परन्तु श्रीरामकृष्णदर्शने ज्ञानविज्ञानशब्दार्थौ भिन्नौ।[10] कथामृतग्रन्थे यत्रैव ज्ञानविज्ञानशब्दौ समागच्छतः तत्रैव तयोरर्थभेदः स्पष्टतया श्रीरामकृष्णभगवत्पादैर्निगदितः। दर्शनेऽस्मिन् ज्ञानं नाम निर्गुणब्रह्मज्ञानं, विज्ञानं नाम निर्गुणब्रह्मज्ञानादनन्तरं सर्वम् ईश्वरस्वरूपत्वेन ज्ञात्वा सर्वरूपेण ईश्वरस्यास्वादनम्। अतो निर्गुणब्रह्मविद् ज्ञानी, निर्गुणसगुणब्रह्मविद् विज्ञानी। आसन् श्रीरामकृष्णपरमहंसा विज्ञानिनः। विज्ञानभावमाश्रित्यैव तैः सर्वेषाम् अध्यात्ममार्गाणां कर्मयोग-ज्ञानयोग-भक्तियोगरूपाणां, वेदान्तसम्प्रदायानां द्वैतविशिष्टाद्वैताद्वैतरूपाणां, धर्माणां हिन्दु-महम्मदीय-क्रिस्तादीनाम्, अन्येषां च हिन्दुधर्मान्तर्गतसम्प्रदायानां वैष्णव-शाक्त-शैवानां समन्वयः प्रतिपादितः। तस्मात् श्रीरामकृष्णदर्शने विज्ञानं नाम किमिति विषये संक्षेपेणादौ पर्यालोचनं विधास्यते।

अद्वैतवेदान्तिनो हि नेतिनेतिमुखेन अद्वैतं साधयन्ति। द्वैतिषु मुख्यतो भक्तिमार्गानुसारिण इतिमुखेन च द्वैतं साधयन्ति। श्रीरामकृष्णमते उभयत्रापि तात्पर्यं विद्यते। विज्ञानिदृष्टिकोणतस्ते उक्तवन्तो यद् आदौ नेतिमुखेन साधको दृश्यमानं प्रपञ्चं परित्यज्य आध्यात्मिकोपलब्धेः सर्वोन्नतं शिखरं प्राप्य अद्वयं ब्रह्मतत्त्वम् अनुभवति, तत इदं जगद् ब्रह्म एवेति अनुभवन् इतिमुखेन ब्रह्म एव जगदाकारेण परिणतमिति पश्यन् सर्वत्र परमतत्त्वमुपलभते- “आदौ नेतिनेतिमुखेन हरिरेव सत्यभूतः, अन्यत्सर्वं मिथ्येति अवगम्यते। ततः स पश्यति यद्धरिरेव सर्वरूपेण विराजते। ईश्वर-माया-जीव-जगद्रूपेण ब्रह्म एव विराजते। आदौ अनुलोमस्ततो विलोमः”[11] इति। श्रीरामकृष्णैः एतादृशाखण्डज्ञानस्य नाम प्रदत्तम् ‘विज्ञानम्’ इति, येन

---

[7]Chatterjee, S. C., 1963, *Classical Indian Philosophies: Their Synthesis in the Philosophy of Sri Ramakrishna,* Calcutta: University of Calcutta. Tapasyananda, Swami, 1990, *Bhakti Schools of Vedānta,* Madras: Sri Ramakrishna Math, pp. 9-33, esp. pp. 23-3. Bhajanananda, Swami, 2010, “Philosophy of Sri Ramakrishna,” University of Calcutta Journal of the Department of Philosophy 9, pp. 1-56, esp. pp. 27-28. pp. 104-152. श्रद्धानन्द, स्वामी, १९९४, *बन्दि तोमाय: रामकृष्ण विवेकानन्द भावाञ्जलि* (बङ्गीय), कोलकाता : उद्बोधन,पृ. १२८-१४१.

[8] Maharaj, Ayon, 2017, “Sri Ramakrishna's Philosophy of Vijñāna Vedānta” International Journal of Hindu Studies 21, pp.25–54.

[9]तथाहि शङ्करभगवत्पादैः गीताभाष्येषु ज्ञानपदेन शास्त्रोक्तपदार्थपरिज्ञानं, विज्ञानपदेन च शास्त्रतो ज्ञातानाम् आत्मादीनां स्वानुभवकरणमित्यर्थो निगदितः। कृपया दृश्यताम्- शङ्करभगवत्पादकृतं गीताभाष्यम् ३.४१, ६.८, ७.२।

[10]केचिदाक्षिपन्ति यत् श्रीरामकृष्णोक्त-विज्ञानशब्दस्य तात्पर्यं ज्ञाने एव, न तु ज्ञानादन्यत्किञ्चित्तत्र प्रस्तूयते इति। परन्तु स्वामिभजनानन्द-स्वामितपस्यानन्द-सतीशचन्द्रच्याटार्जि-अयनमहाराजादीनां मते तु विज्ञानशब्दस्यार्थो ज्ञानापेक्षया भिन्न एव। कथामृते तददतीव सुष्पष्टतया निगदितम्।

[11] *कथामृत*, पृ. ४७०। (बङ्गीयमूलग्रन्थतः संस्कृतानुवादः सर्वत्र मत्कृतः)

जगदतीतस्य जगद्व्यापिनश्च ब्रह्मणो ज्ञानं भवति। तथाहि श्रीरामकृष्णभगवत्पादानां स्वकीयभाषा :

> "विज्ञानम्- विशेषरूपेण तस्य ज्ञानम्। काष्ठे अग्निरस्तीति बोधो विश्वासश्च ज्ञानम्। तेन अग्निना ओदनं पक्त्वा, भुक्त्वा, हृष्टपुष्टभवनं नाम विज्ञानम्। ईश्वरोऽस्तीति बोधो ज्ञानम्, स एव जीवजगद्रूपेण स्थित इति ज्ञानं विज्ञानपदवाच्यम्"[12] इति।

इदानीं श्रीश्रीरामकृष्णकथामृतग्रन्थमाश्रित्य विज्ञानविषये श्रीरामकृष्णैर्यद्यदुक्तं तस्यैव सारो दिङ्मात्रमुपस्थाप्यते। तत्रादौ ज्ञान्यपेक्षया विज्ञानिनोऽनुभवो व्यापकः सुविस्तृत इति श्रीरामकृष्णमतम्। कथामृतग्रन्थे बहुत्र ज्ञानिविज्ञानिनोर्भेदं निगदद्भिस्तैरुच्यते :

> ज्ञानी 'नेति'-'नेति'- मुखेन विषयबुद्धिं जहाति, तदैव स ब्रह्मज्ञानं लभते। यथा सोपानेषु एकैकं परित्यज्य छदिः प्राप्यते। विज्ञानी तु विशेषरूपेण तेन [परब्रह्मणा] सह आलपते, स अधिकं किञ्चित् प्रत्यक्षीकरोति [अनुभवति]। स पश्यति, छदिर्यैर्वस्तुभिरिष्टकादिभिर्निर्मिता, ताभिरेवेष्टकादिभिः सोपानान्यपि निर्मितानि। 'नेति'-'नेति'- मुखेन ब्रह्मत्वेन यद् बुध्यते तदेव जीवा जगच्च अभवन्। विज्ञानी पश्यति, यन्निर्गुणं तदेव सगुणम्।[13] इति।

अत्र स्पष्टमुच्यते श्रीरामकृष्णैर्यद् विज्ञानी ज्ञान्यपेक्षया अधिकं किञ्चित् प्रत्यक्षीकरोतीति। ज्ञानिपदेनात्र शुष्कविचारमार्गानुसारिणोऽद्वैतवेदान्तवादिनो बोध्यन्ते। ज्ञानादनन्तरं च विज्ञानमिति निगदद्भिः श्रीरामकृष्णैरुच्यते- "परन्तु ब्रह्मज्ञानात् परमप्यस्ति। ज्ञानाद् अनन्तरं विज्ञानम्"[14] इति। विज्ञानविषये श्रीरामकृष्णेनोच्यते यद् यस्य ज्ञानमस्ति तस्य अज्ञानमप्यस्ति। अत उभयं परित्यज्य विज्ञानम् आश्रयणीयम्।[15] ज्ञानी केवलं शुष्कविचारमार्गमाश्रित्य तिष्ठति, परन्तु विज्ञानी ब्रह्मज्ञानात्परमपि भक्तिभावमाश्रित्य तिष्ठति। उच्यते च श्रीरामकृष्णभगवत्पादैः "नारदादयो ब्रह्मज्ञानादनन्तरमपि भक्तिमाश्रित्य स्थितवन्तः। एतदेव विज्ञानम्।" इति।[16]

ननु यदि अद्वैतं ब्रह्मैव परमं तत्त्वं तर्हि अद्वितीयब्रह्मप्राप्तिरेव ज्ञानं नाम मोक्ष इत्यङ्गीकार्यम्। तेन अद्वैतब्रह्मज्ञानादनन्तरमपि विज्ञानानुभवोऽस्तीति यदुच्यते तन्नैवोपपद्यते इति चेन्न। श्रीरामकृष्णमते निर्गुणं ब्रह्मैव सत्यमिति न, किन्तु सगुणब्रह्म जीवा जगच्चापि सत्यभूतम्, ईश्वरस्यैव प्रकाशरूपम्। अतः सर्वं परित्यज्य निर्गुणब्रह्मप्राप्तिः यद्यपि अद्वैतज्ञानं तथापि तत्पूर्णज्ञानं नास्ति, सर्वं स्वीकृत्य यदद्वैतात्मकं ज्ञानं तदेवात्र श्रीरामकृष्णानां विज्ञानानुभवसम्मतं पूर्णाद्वैतज्ञानम्। अतो निर्गुणब्रह्म यद्यपि परमं तत्त्वं तथापि तदनुभव एव अन्तिमो नास्तीति श्रीरामकृष्णपरमहंसानाम् अभिप्रायः। निर्गुणब्रह्मानुभूतेरनन्तरमपि भगवत इच्छावशाद् ईश्वरकोटयोऽवतारपुरुषाश्च विज्ञानभावमाश्रित्य जगति स्थातुं शक्नुवन्तीति तन्मतम्।

इतोऽवगम्यते यत् शङ्करस्याद्वैतवेदान्तदर्शने यन्नेति-नेति-मुखेन सर्वत्यागपुरःसरं निर्गुणब्रह्मप्राप्तिरुच्यते तदेवात्र श्रीरामकृष्णदर्शने ज्ञानमित्युच्यते। अद्वैतवेदान्ते स एव मोक्षः, सैव परमा प्राप्तिः, तदेव परमं ज्ञानम्।

---

[12]तदेव, पृ. ३११।

[13]तदेव, पृ. ५०-५१। *"ज्ञानी 'नेति' 'नेति' करे विषयबुद्धि त्याग करे, तवे ब्रह्मके जानते पारे। येमन सिँड़िर धाप छाड़िये छादे पौंछानो याय। किन्तु विज्ञानी यिनि विशेषरूपे ताँर सङ्गे आलाप करेन तिनि आरओ किछु दर्शन करेन। तिनि देखेन, छाद ये जिनिसे तैयारि- सेइ इँट, चुन, सुरकितेइ, सिँड़िओ तैयारि। 'नेति' 'नेति' करे याँके ब्रह्म वले बोध हयेछे तिनिइ जीवजगत् हयेछेन। विज्ञानी देखे, यिनि निर्गुण तिनिइ सगुण।"* अन्यत्रापि, ४१५, ४३७, ५३४, ६३०।

[14]तदेव, पृ. २६६।

[15]तदेव, पृ. ५३४, २६६, ४०२, ८३६, ९२१, ९७४, ९८७।

[16]तदेव, पृ. ५३४।

अद्वैतवेदान्तदर्शनापेक्षया श्रीरामकृष्णदर्शने तु किञ्चिद् विलक्षणमुच्यते। श्रीरामकृष्णमते निर्गुणब्रह्मलाभात् परं तु ज्ञानी सर्वत्र ब्रह्मैव अनुभवन् पश्यन् स्पृशन् परमानन्दम् आस्वादयति। एतदेव विज्ञानम्। ज्ञानी स्वप्नवज्जगन्मिथ्येति पश्यति, विज्ञानी तु जगदपि ब्रह्मणः प्रकाशत्वेन पश्यति। ज्ञानी ब्रह्मज्ञानात् परं सर्वं मिथ्येति पश्यति, परन्तु विज्ञानी जगद् आनन्दस्य हट्टत्वेन पश्यति। विज्ञानी पश्यति यद् यद्ब्रह्म नित्यं निर्गुणं च, तदेव लीलया जीवा जगच्च संवृत्तानि। विज्ञानी केवलं ब्रह्म निर्गुणत्वेन न पश्यति, किन्तु निर्गुणत्वेन सगुणत्वेन तद्व्यतिरिक्तत्वेन च पश्यति। विज्ञानतत्त्वे प्रतिष्ठिताः श्रीरामकृष्णाः सर्वेषां दर्शनानां मतानां धर्माणां च समन्वयं चक्रुः। ते कस्यापि मतस्य धर्ममार्गस्य वा निन्दां न कृतवन्तः, किन्तु सर्वेषामपि परमं लक्ष्यम् ईश्वरप्राप्तिरेवेति ज्ञापितवन्तः। एवम् ईश्वरस्वरूपविषयेऽपि श्रीरामकृष्णचरणानां यन्मतं तद् विज्ञानतत्त्वाधारेणेति ज्ञेयम्। विज्ञानतत्त्वव्यतिरेकेण तदीयदर्शनसिद्धान्तो यथार्थतया अवबोद्धुं नैव शक्यते इति कारणात् प्रथमतो मया विज्ञानविषयः सामान्यतो विचारितः।

### विज्ञानदृष्ट्या ईश्वरस्वरूपविचारः -

इदानीं श्रीरामकृष्णचरणानां मते परमतत्त्वं नाम किमिति विषये विस्तरेण पर्यालोचनं करिष्यते। श्रीरामकृष्णपरमहंसा आदौ गुरुं विनैव स्वीयानुरागेण सप्रसभं जगन्मातुश्चैतन्यस्वरूपं साक्षाच्चक्रुः। ततो गुरुनिर्दिष्टान् मार्गान् अनुसृत्य जगन्मातुर्भिन्नं भिन्नं स्वरूपं साक्षात्कृत्य अन्तिमे सिद्धान्तं चक्रुर्यत् सर्वे धर्ममार्गा जगन्मातुर्भिन्नभिन्नस्वरूपपर्यवसानपरा, जगन्माता त्वेकैव। सा जगन्माता हि परमतत्त्वम्। तदेव परमतत्त्वं मयात्र ईश्वरशब्देनाभिधीयते। श्रीरामकृष्णा अपि ईश्वरशब्दं सर्वथा व्यवजहुः। श्रीरामकृष्णदर्शनसम्मतस्य ईश्वरस्वरूपस्य पर्यालोचनात् प्राक् केचन विषया अस्माभिः सदा स्मर्तव्या अन्यथा प्रतिपदं संशयः समुत्पद्येत। तथाहि श्रीरामकृष्णदर्शने ईश्वरस्वरूपनिर्धारणे बुद्धेरुपयोगो नैव कार्यः। श्रीरामकृष्णदर्शनमते तर्केण युक्त्या सीमीतबुद्ध्या वा ईश्वरस्य निर्गुणगुणमयस्वरूपं बोद्धुं नैव शक्यते। अतः कथं निर्गुणः अनध्यस्ततया सगुणो भवेत्, कथं वा सगुणो निर्गुणो भवेदिति न चिन्तनीयम्। ईश्वरो हि अपरिच्छिन्नः स्वतन्त्रः, कथं स सीमीतबुद्धिभिरस्माभिः इदमित्थमेवेति परिच्छिद्येत? न हि घटमितेन पात्रेण समुद्रजलं कियदस्तीति परिमातुं शक्यते।[17] तस्माद् ईश्वरस्वरूपनिर्धारणे बुद्धेरुपयोगो नैव कार्यः। विज्ञानवेदान्तस्यायमेकः प्रमुखः सिद्धान्तः। "नैषा तर्केण मतिरापनेया" (कठोपनिषत् १.२.९) "अन्यदेव तद्विदितादथो अविदितादधि" (केनोपनिषत् १.३-४), यन्मनसा न मनुते येनाहुर्मनो मतम् (केनोपनिषत् १.६), "अव्यक्तोऽयम् अचिन्त्योऽयमविकार्योऽयमुच्यते" (श्रीमद्भगवद्गीता २.२५) इत्यादिश्रुतिस्मृतिवचांसि अपि प्रसङ्गेऽस्मिन् अवधेयानि। उच्यते च महाभारतेऽपि -

अचिन्त्या खलु ये भावा न तांस्तर्केण योजयेत्।
प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्॥ इति।[18] एवं श्रीरामकृष्णदर्शनानुसारेण ईश्वरस्वरूपपर्यालोचनकाले विषयोऽयं सदा स्मर्तव्यः। इदानीं कथामृतग्रन्थे ईश्वरस्य स्वरूपविषये श्रीरामकृष्णपरमहंसैः यदुक्तं तस्य सारः संक्षेपेण पर्यालोचयामः।

श्रीरामकृष्णमते ईश्वरो हि सच्चिदानन्दसागरः परमसत्यभूतः। तस्येश्वरस्य अनन्तानि रूपाणि अनन्ताश्च भावा विद्यन्ते। तन्मते ईश्वरो हि साकारो निराकारः तदुभयसमन्वितोऽपि तदुभयातिरिक्तः, तस्य आन्तं वक्तुं न शक्यते।[19] तथाहि कथामृते ईश्वरस्य निर्गुणगुणमयरूपेणोपस्थितिर्निगद्यते :

---

[17]कथामृतग्रन्थे श्रीरामकृष्णैरेतादृशा दृष्टान्ता बहवः प्रदत्ताः। कृपया दृश्यताम् - *कथामृत*, पृ. २२९, पृ. ६६९, ९३४।

[18]वेदव्यासः, २००८, *महाभारतम्*, गीताप्रेस : गोरखपुर, श्लोकक्रमाङ्कः ६-५-१२।

[19] *कथामृत*, पृ. १५२। "*हाँ, ईश्वर साकार आवार निराकार, आवार साकार-निराकारेरओ पार। ताँर इति करा याय ना*" इति, अस्यार्थो हि ईश्वरः साकारो निराकारः साकारनिराकाराभ्यामतिरिक्तश्च। तस्यान्तं कर्तुं न शक्यते इति।

कश्चिद् ब्राह्मभक्तः श्रीरामकृष्णं पप्रच्छ, ईश्वरः साकारो निराकारो वा?

श्रीरामकृष्णः— तस्य आन्तं वक्तुं न शक्यते। स निराकारः, पुनश्च साकारः। भक्तानां कृते स साकारः। ये ज्ञानिनोऽर्थाद् येषां कृते जगत् स्वप्नवत् प्रतिभाति, तेषां कृते स निराकारः। भक्तो जानाति यद् अहं भिन्नो जगच्च भिन्नं वस्तु। तस्माद् भक्तसमीपे ईश्वरो व्यक्तिरूपेण आत्मानं दर्शयति। ज्ञानी यथा वेदान्तवादी, सर्वदा नेति नेति विचारं करोति। विचार्य ज्ञानी स्वरूपतो वेत्ति यदहं मिथ्या, जगदपि स्वप्नवन्मिथ्या। ज्ञानी स्वरूपतो ब्रह्म साक्षात्करोति। ब्रह्म किमिति वचसा प्रकटयितुं न शक्यते।

कीदृशं जानासि? सच्चिदानन्दसागर इव कूलं तीरं वा नास्ति, भक्तिरूपेण शैत्येन स्थानेषु जलं हिमखण्डं संवृत्तं - हिमखण्डाकारेण कठिनीभवति। अर्थाद्भक्तानां सविधे स व्यक्ततया कदाचित् साकारं रूपं धत्ते। ज्ञानसूर्ये उदिते स हिमखण्डस्तरलो भवति, तदा व्यक्तिरूपेणेश्वरो न ज्ञायते, तस्य रूपदर्शनमपि न भवति। स कीदृश इति वाचा कथयितुं न शक्यते।[20] इति।

इतः स्पष्टमवगम्यते यद् भिन्नजनानां कृते स्वीयभिन्नभिन्नरूपाणि प्रदर्शयति ईश्वरः। भक्तानां कृते स साकारो, ज्ञानिनां कृते तु निराकारः। साकारोऽपि सत्यः, निराकारोऽपि सत्यः[21]। न केवलम् सकृत्, पुनः पुनरीश्वरस्य स्वरूपविषये सदृष्टान्तमेतदेव मतं निगद्यते श्रीरामकृष्णैः। तथाहि केनचिद् वैष्णवगोस्वामिना तेषां वार्तालापोऽत्रोपस्थाप्यते :

> "मम धर्म एव यथार्थोऽन्येषां तु मिथ्या एतादृशी बुद्धिर्न शोभते। ईश्वरो नानामार्गैः प्राप्यः। केचित् पुनः कथयन्ति ईश्वरः साकारो, न तु निराकारः। एतदाश्रित्य पुनर्विवादः। यो वैष्णवः स वेदान्तवादिना विवदते। यदि ईश्वरस्य साक्षाद्दर्शनं भवति, तदा सम्यक्तया वक्तुं शक्यते। यः साक्षात्कृतवान् स सम्यग् विजानाति यद् ईश्वरः साकारः, पुनश्च निराकारः। तदरिक्तोऽपि स भवति। तत्स्वरूपं किमिति वक्तुं न शक्यते।
>
> केचन अन्धा हस्तिनमेकं प्रापुः। केनचित्ते ज्ञापिता यदेष हस्तिनामधेयः। तदा हस्तिस्वरूपं किमिति पृष्टास्ते अन्धा हस्तिनं स्पृष्टवन्तः। ततो यो हस्तिनः पादस्पर्शं कृतवान् स उक्तवान् यद्धस्ती स्तम्भ इव! यः कर्णस्पर्शं कृतवान् स उक्तवान् हस्ती शूर्प इव। एवं ये उदरे शुण्डे च स्पर्शं चक्रुस्ते तथैव हस्तीत्युक्तवन्तः। एवमेवेश्वरविषये यो यावज्जानाति स चिन्तयतीश्वरस्तावानेव, अन्यत् किञ्चिन्नास्ति।...ईश्वरः केवलं साकार इति न मन्यताम्। स श्रीकृष्ण इव मानवदेहमाश्रित्य समागच्छत्येतदपि सत्यं, नानारूपं धृत्वा भक्ताय दर्शयत्येतदपि सत्यम्। पुनश्च स निराकारोऽखण्डसच्चिदानन्दस्वरूप एतदपि सत्यम्। वेदे स साकारत्वेन निराकारत्वेन चाम्नातः,

[20]तदेव, पृ. ९९। "*एकजन ब्राह्मभक्त जिज्ञासा करिलेन, ईश्वर साकार ना निराकार? श्रीरामकृष्ण— ताँर इति करा याय ना। तिनि निराकार आवार साकार। भक्तेर जन्य तिनि साकार। यारा ज्ञानी अर्थात् जगत्के यादेर स्वप्नवत् मने हयेछे, तादेर पक्षे तिनि निराकार। भक्त जाने आमि एकटि जिनिस, जगत् एकटि जिनिस। ताइ भक्तेर काछे ईश्वर 'व्यक्ति' (Personal God) हये देखा देन। ज्ञानी—येमन वेदान्तवादी—केवल नेति नेति विचार करे। विचार करे ज्ञानीर बोधे बोध हय ये, "आमि मिथ्या, जगत्ओ मिथ्या—स्वप्नवत्।" ज्ञानी ब्रह्मके बोधे बोध करे। तिनि ये कि, मुखे बलते पारे ना।*

*किरकम जान? येन सच्चिदानन्द-समुद्र—कूल-किनारा नाइ—भक्तिहिमे स्थाने स्थाने जल बरफ आकारे जमाट बाँधे। अर्थात् भक्तेर काछे तिनि व्यक्तभावे, कखन कखन साकार रूप धरे थाकेन। ज्ञान-सूर्य उठले से बरफ गले याय, तखन आर ईश्वरके व्यक्ति बले बोध हय ना।—ताँर रूपओ दर्शन हय ना। कि तिनि मुखे बला याय ना।*" इति।

[21]तदेव, पृ. १८। महेन्द्रनाथं प्रति श्रीरामकृष्ण उवाच- "निराकारे विश्वासोऽस्तीत्युत्तम एव। परन्तु एवं न चिन्तयतु यद् एतदेव सत्यम्, अन्यत् सर्वं मिथ्या। एतज्ज्ञानातु यत्, निराकारोऽपि सत्यः, साकारोऽपि सत्यः। भवतो यस्मिन् विश्वासोऽस्ति तद् दृढतया आश्रयतु।" इति।

सगुणत्वेन निर्गुणत्वेन चाम्नातः” इति।[22]

श्रीरामकृष्णदर्शने यादृशम् ईश्वरस्वरूपं स्वीक्रियते तद् विलक्षणमेव। अद्वैतवेदान्तदर्शने ईश्वरस्य निर्गुणनिराकारस्वरूपमेव पारमार्थिकसत्यतया अभ्युपगम्यते, तत्र सगुणस्य मायोपहितस्य ईश्वरस्य स्वीकारो यद्यप्यस्ति तथापि तस्य पारमार्थिकसत्यता नाभ्युपगम्यते। विशिष्टाद्वैताद्यद्वैतेतरदर्शनेषु अनन्तगुणविशिष्टस्य अखिलहेयगुणविवर्जितस्य वा ईश्वरस्य परमार्थसत्यतया स्वीक्रियते चेदपि अद्वैतवेदान्तसम्मतस्य निर्गुणस्य परमेश्वरस्य स्वीकारो नास्ति। श्रीरामकृष्णदर्शने तु अद्वैतवेदान्तसम्मतस्य निर्गुणस्य द्वैतविशिष्टाद्वैतवेदान्तादिसम्मतस्य सगुणस्य तदुभयव्यतिरिक्तस्य चेश्वरस्य परमार्थसत्यतया स्वीकारोऽस्ति।

ननु ईश्वरः सगुणः साकारो भवति चेन्निर्गुणो निराकारः कथं भवेत्? निर्गुणो निराकारश्चेत् सगुणः साकारः वा कथं भवेत्? एकस्मिन् परमार्थसत्यभूते वस्तुनि परस्परविरुद्धनानाधर्माणां समावेशः कदापि न सङ्गच्छते। न चैतादृशः कश्चिद् दृष्टान्तोऽपि प्रदर्शयितुं शक्यते यत्र परस्परविरुद्धधर्माणां समावेशो दृश्यते इति चेत् सत्यम्। बुद्धिगम्ये एव विषये अयं नियमो यत् परस्परविरुद्धधर्माणामेकत्र समावेशो न सम्भवतीति। आत्मतत्त्वं तु न बुद्धिगम्यम् । अतो बुद्ध्यगम्ये आत्मतत्त्वे बुद्धेरुपयोगो नैव समीचीनः। किञ्च, परमेश्वरो हि स्वतन्त्रः। न हि सोऽस्मत्क्षुद्रबुद्धिकृतनियमगम्यः। अत आत्मस्वरूपम् एवमेवेति बुद्ध्युपयोगेन निश्चिततयावधारणम् असमीचीनम्। स्वतन्त्रः स स्वीयस्वतन्त्रताबलेनैव साकारनिराकारनिर्गुण-सगुणाद्यनन्तं रूपं स्वीकुर्यात्। एतदेव खलु तस्य स्वातन्त्र्यम्। श्रीरामकृष्णैरप्युक्तं यदेकमेव तद्वस्तु कदापि न उच्छिष्टमभून्नापि भविष्यति। तद्धि ब्रह्म। अत्रोच्छिष्टपदेन वाचा प्रकाशनमित्यर्थो विज्ञेयः। अर्थाद् ब्रह्मतत्त्वं वाचा प्रकाशयितुमशक्यम्। तद्धि अनुभवमात्रगोचरम्। अत ईश्वरः केवलो निर्गुणः, केवलो वा सगुण इत्यादिपरिच्छिन्नबुद्धिः ईश्वरविषये नैव समीचीना।

यदुक्तं पुनः परस्परविरुद्धधर्माणाम् एकस्मिन् वस्तुनि समावेशस्य दृष्टान्तो नास्तीति तत्प्रत्युच्यते- अस्ति हि दृष्टान्तः। श्रीरामकृष्णभगवत्पादैः स्वयं कृकलासस्योदाहरणं प्रयच्छद्भिरुक्तं कृकलासः कदाचिन्नीलवर्णं कदाचिद् रक्तवर्णं कदाचिद्धरितवर्णं कदाचित् पीतवर्णं धत्ते, कदाचिच्च निर्वर्णस्तिष्ठति।[23] एवम् एकस्मिन् कृकलासे यथा विरुद्धवर्णाः सम्भवन्ति, क्वचिच्च कश्चिदपि वर्णो न दृश्यते, तद्वद् एकस्मिन् परमेश्वरे विरुद्धधर्माः सङ्गच्छेयुरिति किमाश्चर्यम्। किञ्च, परमेश्वरे विरुद्धधर्मा राजन्ते इति साक्षात् श्रुतय आमनन्ति। तथाह्याम्नायते- “अणोरणीयान् महतो महीयान्” (कठोपनिषत् १.२.२०) इति, “आसीनो दूरं व्रजति शयानो याति सर्वतः” (कठोपनिषत् २.२१) च काठके, “तदेजति तन्नैजति तद्दूरे तद्वन्तिके। तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः” (ईशोपनिषत् ५) इति चेशावास्योपनिषदि। किञ्च, दृष्टान्तबलेन परमार्थवस्तु कथञ्चिद् बोधयितुं न शक्यते। व्यवहारसिद्धये एव दृष्टान्तस्योपयोगः। अद्वितीये मनसाप्यगम्ये अचिन्त्यमाने च वस्तुनि दृष्टान्तान्वेषणं न बुद्धिमतां कार्यम्। अतः परमेश्वरस्वरूपविषये दृष्टान्तान्वेषणमयुक्तम्। अद्वैतदृष्ट्यापि वयं सर्वे मायान्तर्गता मायिकेन बुद्ध्यादिवस्त्वाधरेणामायिकं परमार्थतत्त्वं ज्ञातुमिच्छामो, यच्च कदापि न सम्भवतीति श्रुतिः आमनति। एतद्वचनसमर्थनपरा “नैषा तर्केण मतिरापनेया” (कठोपनिषत् १.२.९) इत्यादिश्रुतयः “तर्काप्रतिष्ठानादन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः” (ब्रह्मसूत्रम् २.१.११) इति च बादरायणकृतं सूत्रं च प्रमाणत्वेनोपस्थापयितुं शक्यते। “अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्” इत्यादिमहाभारतश्लोकोऽपि एतन्मतं समर्थयति। अतः परमतत्त्वविषये इदमित्थमिति बुद्ध्यावधारणं न युक्तम्। एवं श्रीरामकृष्णदर्शनस्यायं भावो न श्रुत्यननुमतोऽपि तु श्रुतिसमर्थित एवेति वक्तुं शक्यते। न हि श्रीरामकृष्णदर्शने युक्तेर्विचारस्य वा स्थानं नास्तीति मन्तव्यं, परन्तु ईश्वरविषये युक्त्या निर्धारितोऽर्थ एव यथार्थ इति न मन्तव्यम्। यत ईश्वरस्वरूपं न कदापि अस्मत्क्षुद्रबुद्धिगम्यम्। तस्माद् ईश्वरः साकारः सगुणोऽपि निराकारो निर्गुणः, तद्व्यतिरिक्तश्चेति नास्ति कश्चिद्दोषः। परमार्थसत्यविषये श्रीरामकृष्णस्यैवं दर्शनं वीक्ष्यैव सतीशचन्द्रच्याटार्जिमहोदय उदघोषयत्:

---

[22]तदेव, पृ. १५१-१५२।

[23]तदेव , पृ. १०१।

> What he [Sri Ramakrishna] here calls God is the Absolute, and the Absolute, he thinks, is describable as personal and impersonal, but being beyond both, it is indescribable and inexpressible. Thus the Absolute, we may say, is the known, the unknown and beyond the known and the unknown.[24]

शतशो वाग्व्यपारेणास्माभिः ईश्वरस्वरूपविषये विचारः क्रियते, परन्तु श्रीरामकृष्णैः ईश्वरप्राप्तये प्रयत्नः कर्तव्य इति पुनः पुनर्निगदितम्। भिन्नभिन्नमार्गैः भिन्नभिन्नानुभूतिभिश्च अस्माभिः वस्तुत एकस्यैवेश्वरस्य आस्वादनं क्रियते इति तन्मतम्। अत ईश्वरस्वरूपविषये विवादं परित्यज्य कथञ्चिद् साधनं कृत्वा ईश्वरलाभाय यत्नः करणीयः सर्वैः। ईश्वरस्वरूपे अधिगते सति विवादः स्वतो निरस्तो भविष्यतीति तन्मतम्।

## ईश्वरस्वरूपविषये उपनिषन्मतसमीक्षणम् -

उपनिषत्सु ब्रह्म सगुणत्वेन निर्गुणत्वेन च वर्णित इति दृश्यते। श्रीरामकृष्णैरप्युक्तं यद् वेदे ईश्वरः साकारत्वेन निराकारत्वेन च वर्णितः। परन्तु उपनिषत्सु सगुणनिर्गुणब्रह्मणोस्तरतमभावो नास्तीति मे मतिः। तथाहि केनोपनिषदि निर्गुणब्रह्मप्रतिपादनादनन्तरम् उमाहैमवत्याख्यानकथनपुरःसरं सगुणं ब्रह्म प्रतिपाद्यते; तैत्तिरीयोपनिषदि "सत्यं ज्ञानमनन्तं ब्रह्म" इति निर्गुणब्रह्मप्रतिपादनानन्तरं "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्येवं सगुणं ब्रह्म प्रतिपाद्यते। विषयेऽस्मिन् अद्वैतिनो ब्रुवन्ति यन्निर्गुणं ब्रह्म कथञ्चिद् बोधयितुं मन्दाधिकारिणां कृते अध्यारोपापवाद-न्यायमाश्रित्यैतादृश उपदेशो, न तु सगुणब्रह्मप्रतिपादने उपनिषदां तात्पर्यमिति। भक्तिमार्गानुसारिणो द्वैतिनोऽस्मिन् विषये कथयन्ति यत् निर्गुणब्रह्मज्ञानादनन्तरं जगदपि ब्रह्मण एव सम्भूतमिति ज्ञानं भवति, ततो जगदन्तर्गतं सर्वमेव वस्तुजातम् ईश्वरस्यैव प्रकाशरूपमिति ज्ञायते; ततो भक्तो भगवन्तमेव सर्वत्र पश्यन्ननन्तानन्दरसमनुभवन् मोदते; एतज्ज्ञानम् अद्वैतज्ञानापेक्षयापि उत्तममिति बोधयितुमेव निर्गुणब्रह्मप्रतिपादनानन्तरं सगुणब्रह्मणो निर्देश इति। विषयेऽस्मिन् वक्तुं शक्यते यत् कृत्स्नासूपनिषत्सु सगुणनिर्गुणब्रह्मणोस्तारतम्यविषये केवलं प्रश्नोपनिषदि एको मन्त्रो वर्तते। तथाहि स मन्त्रः -

एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः।
तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति॥ (प्रश्नोपनिषत् ५.२) इति। अत्र परं ब्रह्म अपरं ब्रह्म इति ब्रह्मणो द्विरूपता श्रूयते। किञ्च, परापरशब्दयोः अर्थानुसन्धानात् सामान्यतः अत्र परं ब्रह्म उत्कृष्टं श्रेष्ठं वा, अपरं ब्रह्म निकृष्टम् अवरं वेति लभ्यते। परन्तु मन्मते अत्र अर्थतः परापरशब्दयोः भेदप्रतीतौ सत्यपि वस्तुतः परापरयोः नाम्नि स्वरूपे च केवलं भेदः। वस्तुतस्तयोः उत्कृष्टनिकृष्टभावो वा नात्र निगद्यते। कुत इति चेत् फलाविशेषात्। तथाहि अत्र मन्त्रे उच्यते- य ओंकारमुपास्ते स परापरयोर्मध्ये यदेव ब्रह्म इच्छति तदेव प्राप्नोति। यदि परापरब्रह्मणोस्तरतमभावोऽत्र प्रतिपिपादयिषितोऽभविष्यत्तर्हि फलभेदोऽवश्यम् अकल्पयिष्यत। न त्वत्र ओंकारोपासनस्य फलभेदो निगद्यते। तेनात्र शब्दतः परापरब्रह्मणोर्भेदप्रतीतौ सत्यपि तत्त्वतो भेदो न निगद्यते इति सगुणनिर्गुणब्रह्मणोः तारतम्यं न उपनिषदि आम्नायत इति निश्चप्रचम्। निरपेक्षतया उपनिषन्मतानां पर्यालोचकेषु आधुनिकाचार्येषु George Thibaut महोदयस्य मतेऽपि उपनिषदि सगुणनिर्गुणब्रह्मणोर्मध्ये तरतमभावो नास्ति। तथाहि तेनोच्यते- " [There is] a clear indication that the author of the Upanishad does not distinguish a higher and lower Brahman in Saṅkara's sense"[25] इति। अतः श्रीरामकृष्णदर्शनदृष्ट्या स्वतन्त्रस्य ईश्वरस्य सगुणं निर्गुणं च स्वरूपं तुल्यबलतया यथार्थमिति उपनिषत्सम्मतमेव।

## उपसंहारः

---

[24]Chatterjee, S. C., 1963, *Classical Indian Philosophies: Their Synthesis in the Philosophy of Sri Ramakrishna*, Calcutta: University of Calcutta, p. 105.

[25] 2004, *The Sacred Books of the East*, Ed. F. Max Muller, Vol. 34, Vedānta Sūtras: with the commentary by Śaṅkarākārya, trans. George Thibaut, part 1, Delhi: Motilal Banarasidass Publishers Private Ltd., p.cxiii.

ईश्वरस्य स्वरूपविषये वेदान्तिनां विवादः सुप्रसिद्धः। वेदान्तो नाम श्रुतिप्रस्थानं स्मृतिप्रस्थानं सूत्रप्रस्थानमिति प्रस्थानत्रयम्। तत्र श्रुतिप्रस्थाने उपनिषदां, स्मृतिप्रस्थाने श्रीमद्भगवद्गीतायाः, सूत्रप्रस्थाने अथवा न्यायप्रस्थाने च बादरायणकृतब्रह्मसूत्राणामन्तर्भावः। प्रस्थानत्रयेऽपि ब्रह्म अथवा ईश्वरः सगुणत्वेन निर्गुणत्वेन च वर्णितः। यद्यपि शङ्करभगवत्पादानामद्वैतदर्शनपरम्परायाम् ईश्वरो नाम सगुणं ब्रह्मेति स्वीक्रियते, शङ्कराचार्यैस्तु तदीयप्रस्थानत्रयभाष्येषु ब्रह्मेश्वरयोस्तथा भेदो न विहितः। तन्मते ईश्वर एव ब्रह्म, स एव सर्वज्ञः सर्वशक्तिश्च। परन्तु क्वचिद् ईश्वरस्यापि अविद्यावत्त्वं तैरङ्गीक्रियते। तथाहि २.१.१४-ब्रह्मसूत्रस्य भाष्ये तेनोच्यते, "तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च, न परमार्थतो विद्यया अपास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते" इति। शङ्करपरवर्तिकालिन आचार्यास्तु ब्रह्मेश्वरयोर्भेदविषये अधिकगुरुत्वम् आरोपितवन्तः। उच्यते च भजनानन्दस्वामिना-

> Śankara hardly makes any distinction between Brahman and *Īśvara* in his commentaries. For him Brahman is not merely an impersonal principle but also the omnipotent, omniscient, omnipresent Lord. ...It was the post Śankara Advaitins who gave too much importance to the distinction between Brahman and *Īśvara*. [26]इति।

अतः सामान्यतया अद्वैतिनां मतं स्वीक्रियते चेद् इदमेव लभ्यते यत्तेषां मते निर्गुणं ब्रह्मैव परमार्थसत्यभूतं, तद्व्यतिरेकेण सर्वं जीवेश्वरजगदादि मिथ्याभूतम्। तेन सगुणं ब्रह्म नाम ईश्वरोऽपि मिथ्याभूत एव।[27] द्वैतिनां मते पुनः ब्रह्म केवलं सगुणं वैयक्तिकं च, न कदाचिदपि निर्गुणम्। अद्वैतेतरवेदान्तेषु अद्वैतसम्मतस्य निर्गुणस्य निराकारस्य ब्रह्मणः स्वीकारो नास्ति। भेदाभेदवेदान्त-विशिष्टाद्वैतवेदान्तादिषु निर्गुणं ब्रह्म अन्तर्यामित्वेन स्वीक्रियते, न तु अद्वैतवेदान्तस्वीकृतस्य निर्गुणस्य ब्रह्मणः स्वीकारस्तत्र विद्यते।[28] काश्मीरीयशैवतन्त्रे परमसत्यतया अद्वितीयस्वरूपम् अङ्गीक्रियते। परमसत्यं हि प्रकाशविमर्शमयं सत्स्वरूपं शक्तियुक्तञ्च। तस्य द्विविधं रूपम् अक्रियं सक्रियं च। अक्रियं रूपं परमशिव इत्युच्यते, सक्रियं रूपं तु शक्तिरित्युच्यते। वस्तुतस्तयोर्नास्ति भेदः। यदेव अक्रियं तदेव सक्रियम्। अतः काश्मीरीयशैवदर्शने परमसत्यं न केवलं निर्गुणं किन्तु सगुणमपि। एतद्दृष्ट्या श्रीरामकृष्णदर्शनेन सह काश्मीरीयशैवदर्शनस्य साम्यमस्तीति दृश्यते।

श्रीरामकृष्णदर्शनमते परमसत्यं तु अद्वैत ईश्वर एव। परन्तु तदद्वैतं न साम्प्रदायिकाद्वैतवेदान्तस्वीकृतम् अद्वैतम् इत्यस्माभिरालोचितम्। अद्वैतवेदान्ते ब्रह्मणो निर्विकल्पत्वेन परमार्थसत्यतया तदतिरिक्तानां जीवेश्वरजगतां मिथ्यात्वम् अङ्गीकृत्य अद्वैतं प्रतिपाद्यते। श्रीरामकृष्णदर्शने तु सर्वो निर्गुणगुणमयस्य ईश्वरस्यैव लीलारूपः प्रकाश इति सर्वम् यथार्थतया अङ्गीकृत्य अद्वैतं प्रतिपाद्यते इत्यस्ति विज्ञानवेदान्तस्य विशेषः। श्रीरामकृष्णस्यायं दर्शनसिद्धान्तः निरपेक्षदृष्टिकोणतो विचार्यते चेत् कस्मिंश्चित् पारम्परिकदर्शनसम्प्रदाये तदीयदर्शनस्यान्तर्भावो न युज्यते। किञ्च, सर्वेषाम् ईश्वरस्वरूपत्वात् "शिवभावनया जीवसेवा" इति स्वामिविवेकानन्दप्रचारितो वेदान्तस्य व्यावहारिकः प्रयोगोऽपि श्रीरामकृष्णदर्शनानुसारेण सङ्गच्छते इति शिवम्।

---

[26]Bhajanananda, Swami, 2010, "Philosophy of Sri Ramakrishna", *Journal of Philosophy,* Calcutta: University of Calcutta, pp.34-35.

[27]Chatterjee, S. C., 1963, *Classical Indian Philosophies: Their Synthesis in the Philosophy of Sri Ramakrishna*, Calcutta: University of Calcutta, p. 110. "But the world is conceived by Śaṅkara as an appearance which rests on our ignorance. So Brahman's creative activity is not real, it is only apparent; Brahman is only apparently associated with creativity. It follows that God is an unreal appearance of Brahman due to its māyā or God is an unreal appearance of Brahman due to its māyā. … Such a God cannot be the proper object of devotion and worship."

[28]Bhajanananda, Swami, 2010, "Philosophy of Sri Ramakrishna: *Journal of Philosophy,* Calcutta: University of Calcutta, p.35. "In some others like the school of Ramanuja and Goudiya Vaishnavism, the Impersonal is treated merely as the *antaryāmin* or Inner Controller who is an aspect of the transcendent Supreme Deity, the Supreme Person."